# संस्कृत वार्ता:

दिनाङ्क : 07/05/2026 सायम् - 06:20

<u>आदौ मुख्यवार्ता:</u>

- प्रधानमन्त्रिणा नरेन्द्रमोदिना आपरेशन् सिन्दूर् इत्यस्य प्रथमवार्षिकोत्सवम् आचरितम्; भयोत्पादनस्य पराजये, तस्य सक्षम-विधिव्यवस्थायाः विनाशे च भारतस्य प्रतिबद्धतां पुनः दृढीकृतम्।
- बिहारस्य मुख्यमन्त्री सम्राट् चौधरी स्वमन्त्रिमण्डलस्य विस्तारं कृतवान्; नितीश-कुमारस्य पुत्रेण सह द्वात्रिंशत् मन्त्रिणः च नूतनमन्त्रिमण्डले शपथ-वचनं स्वीकृतवन्तः।
- तमिलनाडु-केरल-राज्ययोः सर्वकार-निर्माणार्थं तीव्रसंवादाः प्रचलन्ति।
- सर्वकारेण चत्वारिंशत् वर्षतः अधिकवयस्कानां कर्मचारिणां कृते राष्ट्रव्यापी-वार्षिक-स्वास्थ्य-परीक्षणोपक्रमं समारब्धम्।
- आई. पी. एल. क्रिकेट्-क्रीडायां, लखनऊ-सूपर-जायण्ट्स् दलम् अद्य सायङ्काले लखनऊ-नगरे रायल्-चैलेंञ्जर्स-बेङ्गलुरु- दलं सम्मुखी करिष्यति।

---------------------------------------------------

<u>प्रधानमन्त्रि</u>

प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तं यत् देशः आतङ्कवादं पराजयितुं, तस्य समर्थकं विधिव्यवस्थां च विघटयितुं दृढः अस्ति। सिन्दूराभियानस्य एकवर्षस्य पूर्त्यवसरे सामाजिकान्तर्जालीये पटले श्रीमोदी अवदत् यत् भारतीय-सशस्त्र-सेनया अभियानावधौ अपूर्वं साहसम्, स्पष्टतां, सुदृढं संकल्पं च प्रदर्शितम्। सः अवदत् यत् पहलगाम इत्यत्र निर्दोष-भारतीयेषु आक्रमणस्य साहसं कर्तृषु सैनिकाः समुचितं प्रतिकारं कृतवन्तः। श्रीमोदी अग्रे अवदत् यत् सशस्त्रसेनायाः शौर्यस्य सम्पूर्णः देशः अभिवादनं करोति। प्रधानमन्त्री अवदत् यत् आतङ्कवादस्य विरुद्धं भारतस्य दृढप्रतिक्रियायाः, राष्ट्रियसुरक्षायाः रक्षणाय तस्य अविचलप्रतिबद्धतायाः च प्रतिबिम्बः एव आपरेशन् सिन्दूर् इति अस्ति ।

राष्ट्रपति द्रौपदी मुर्मुः उपराष्ट्रपति सी पी राधाकृष्णन् वर्यः चापि स्व मनोभावं समाजिकान्तर्जालीये पटले प्रकटितवन्तौ।

------------------------------------------------------

## बिहार-मन्त्रिमण्डलम्

बिहार-राज्ये अद्य मुख्यमन्त्री-सम्राट-चौधरी-इत्यस्य नेतृत्वे मन्त्रिमण्डलस्य विस्तारः अभवत्। पटना-नगरस्य गान्धी-मैदान इत्यत्र आयोजिते भव्य-समारोहे राज्यपालः सेवानिवृत्तः लेफ्टिनेण्ट्-जनरल्-सैयद्-अता-हस्नैन् द्वात्रिंशत् नवनियुक्तेभ्य: मन्त्रिभ्यः पदस्य गोपनीयतायाश्च शपथं प्रदत्तवान्। मन्त्रिमण्डले अधुना भारतीय-जनता-पार्टीति दलस्य पञ्चदश, जनता-दल-यूनाइटेड-दलस्य त्रयोदश, (रामविलास्) लोक-जनशक्ति-दलस्य द्वौ, हिन्दुस्तानी-आवाम्-मोर्चा तथा राष्ट्रिय-लोक-मोर्चा-दलयोः प्रत्येकतः एकः मन्त्री अस्ति। मन्त्रिणः प्रथमं पञ्च-समूहेषु, ततः षट्-समूहेषु च शपथं स्वीकृतवन्तः। शपथग्रहण-समारोहे सम्मिलितेषु प्रमुखेषु मन्त्रिषु जनता-दल-यूनाइटेड-दलस्य अध्यक्षस्य नितीश-कुमारस्य पुत्रः निशान्त-कुमारः अपि आसीत्। उल्लेखनीयम् अस्ति यत् नितिश-कुमार: गत-मासे राज्यसभां प्रति गन्तुं मुख्यमन्त्रीपदात् त्यागपत्रं समर्पितवान्।

------------------------------------------------------

## तमिलनाडु

तमिलनाडु-राज्ये टी. वी. के. प्रमुखः जोसेफ् विजयः अद्य लोकभवने द्वितीयवारं राज्यपालेन विश्वनाथ आर्लेकर वर्येण सह मिलितवान्। राज्यपालेन एव तस्मै आहूतम् इति कथ्यते। तेन सह मेलनानन्तरं राज्यपालः अपि केरल-राज्यं प्रति प्रस्थास्यति इति सम्भावना विद्यते। ह्यः अपि विजयः राज्यपालेन सह मिलित्वा दलस्य विधायकानां सूचीं, काङ्ग्रेस्-दलस्य समर्थनपत्रं च उपस्थापितवान् आसीत्। अस्मिन् समये बहुमतं प्रदर्शयितुं तस्य समर्थनस्य आवश्यकता आसीत्। वी. सी. के. दलस्य नेता थिरुमा-वलवनः अवदत् यत् तस्य दलम् अद्य विधायक-दलस्य सभायाः अनन्तरं विजयस्य समर्थनाय निर्णयं करिष्यति। तस्य दलस्य द्वौ विधायकौ स्तः। वाम-दलनि अपि राज्यपालं प्रार्थयन्ति यत् बृहत्तमं दलम् टी. वी. के. इत्यमुं सर्वकारस्य निर्माणस्य अवसरः प्रदीयन्तु।

-----------------------------------------------------

## मनसुख-माण्डविया

श्रम-वृत्त्यावसर-मन्त्री डा. मनसुख-माण्डविया अद्य नूतन-श्रम-संहितायाः अन्तर्गतं चत्वारिंशत्-वर्षतः अधिक-वयस्कानां कर्मचारिणां कृते राष्ट्रव्यापी-वार्षिक-स्वास्थ्य-परीक्षण-उपक्रमम् आरब्धवान्। अद्य नवदिल्लयाः कर्मचारी-राज्य-आश्वस्ति-निगमस्य (ई.एस्.आई.सी.) चिकित्सा-महाविद्यालये चिकित्सालये च उपक्रमस्य आरम्भं कुर्वन् मन्त्री अवदत् यत् प्रधानमन्त्री-नरेन्द्र-मोदिनः नेतृत्वे गत-द्वादश-वर्षेषु देशस्य कार्यबलस्य युवाशक्तेः च सम्मानः महत्त्वपूर्णरूपेण वर्धितः अस्ति। सः अवदत् यत् सर्वकारः वृत्यवसराणां सर्जनाय निरन्तरं प्रयतमानः अस्ति। परिणामतः निरुद्योग-दरः प्रायः त्रि-दशमलव-द्वि प्रतिशतं यावत् न्यूनीकृतः अस्ति।

-----------------------------------------------------

## पश्चिमबङ्गाल

पश्चिमबङ्गालराज्ये नूतनसर्वकारस्य निर्माणार्थं राजनैतिकसंवादाः तीव्राः जाताः। पश्चिमबङ्गालराज्ये, भाजपेति दलस्य विधायकस्य सुभेन्दु अधिकारिणः निकटसहायकस्य हत्यायाः विषये, राज्य-आरक्षकैः त्रयः जनाः निगडिताः सन्ति। आरक्षकैः सप्तसदस्यीयाः विशेष-अन्वेषण-दलं (एस्.आई. टि.) अपि निर्मितम्। एतत् सी. आई. डी. दलस्य आई. जी. इत्यस्य निरीक्षणे कार्यं करिष्यति। दलस्य सदस्येषु सी.आई. डी., एस्. टी. एफ़्., राज्यारक्षी-दलस्य गुप्तचरशाखायाः च अधिकारिणः सम्मिलिताः भविष्यन्ति।

-----------------------------------------------------

## आपरेशन् सिन्दूर्

भारतेन अद्य उक्तं यत् सीमपारस्य भयोत्पादनस्य प्रायोजकत्वाय पाकिस्तानाय आपरेशन् सिन्दूर् इत्यभियानस्य समये समुचितं उत्तरं प्रदत्तम्। नवदिल्ल्यां वार्ताहरान् संबोधयन् विदेश मन्त्रालयस्य प्रवक्ता रणधीर जायसवालः अवदत् यत् सीमापारस्य भयोत्पादनं पाकिस्तानदेशेन राज्यनीतेः साधनरूपेण बहुकालात् प्रयुक्तम् अस्ति। सः अवदत् यत् भयोत्पादनस्य विरुद्धं स्वसंरक्षणार्थं भारतस्य पार्श्वे सर्वाधिकारः अस्ति, भयोत्पादनस्य विरुद्धं वैश्विकयुद्धं सुदृढं कर्तुं

निरन्तरं कार्यं करिष्यति। अवैध-बाङ्ग्लादेशी-जनानाम् प्रत्यागमनस्य विषये प्रश्नस्य प्रत्युत्तरे श्री जायसवालः अवदत् यत् बाङ्ग्लादेशे षष्ठ्यधिक अष्टशतोत्तर द्विसहस्रतोप्यधिकाः राष्ट्रियता-सत्यापनाय विचाराधीनाः सन्ति।

-----------------------------------------------------

## भारत-ऋतु-विभाग

भारत-ऋतु-विभागेन आगामि-दिन-द्वयोः केरलम्-माहे-दक्षिणान्तरिक-कर्नाटक-तमिल्नाडु-पुदुचेरी-करैकल-इत्येतेषां राज्यानां पृथक्-पृथक् स्थानेषु प्रचण्डवृष्टेः पूर्वानुमानं प्रकटितम्। श्वः यावत् उत्तरप्रदेशे, आन्ध्रप्रदेशे, बिहारे, छत्तीसगढ़े, गोवाराज्ये च मेघस्फोटेन सह वृष्टेः तीव्रवायोः च सम्भावना अस्ति इति ऋतु-विभागेन उक्तम्। श्वः मध्यप्रदेशे, मध्य-महाराष्ट्रे, मराठ्वाडायां, अण्डमान्-निकोबार्-द्वीपयोः, देशस्य पूर्वोत्तरराज्येषु च एतादृशेः स्थितेः संभावना विद्यते।

-----------------------------------------------------

## आई पी एल क्रिकेट

आई पी एल क्रिकेट क्रीडायाम् अद्य लखनऊ सुपर जायंट्स दलं रॉयल चैलेंजर्स बेंगलुरु दलं लखनऊ-नगरस्थे भारतरत्न श्रीअटल बिहारी वाजपेयी एकाना क्रिकेट क्रीडाङ्गणे सम्मुखी करिष्यति। क्रीडायाः आरम्भः सायं सार्द्ध सप्तवादने भविष्यति।

।। इति वार्ता: ।।